ISSN 2278 - 0688
Volume - XVI

# ऋतायनी

A REFEREED RESEARCH JOURNAL OF SANSKRIT

Purulia , West Bengal

ISSN 2278 - 0688
Volume- XVI
December 2019

# ऋतायनी

## A REFEREED RESEARCH JOURNAL OF SANSKRIT

(U.G.C. Approved, Journal No.40947)

**Chief Editor**
**Dr. Chandrakanta Panda**

**Editor**
**Dr. Jagamohan Acharya**

**Associate Editors**
Dr. Buddheswar Sarangi
Dr. Jogeswar Mahanta
Dr. Sushant Pradhan

Purulia, West Bengal

# CONTENTS


| | | | |
|---|---|---|---|
| 1. | Worshiping of mother earth in Puranic Literature and its relevance | Dr. Subash Chandra Dash | 1 |
| 2. | शिशुपालवधस्य प्रथमसर्गे प्रयुक्तानां तिङन्तपदानां धातुमूलकमध्ययनम् | व्रजसुन्दर मिश्र: | 8 |
| 3. | Creative contribution of Keshab Chandra Dash to the field of Sanskrit | Zyotsna Ranny Patraw | 14 |
| 4. | Perspectives of Vedic Kingship in Sanskrit Literature | Dr.Shantipriya Devi | 19 |
| 5. | Scientific elements in Vaisesika system | Dr. Sasmita Kar | 29 |
| 6. | संगीतविशारद: भक्तकवि: जयदेव: | श्रीगोपाल प्रसाद महापात्र: | 36 |
| 7. | संस्कृतवाङ्मये पर्यावरणचेतना | Dr. Sushant Pradhan | 46 |
| 8. | The Philosophical Aspects as Described in the *Nirvāna Upanisad* | Seema rani Rath | 53 |
| 9. | आधुनिकसाहित्येषु समाजस्य चित्रम् | जगमोहन आचार्य: | 61 |
| 10. | मम्मटदिशा अतिशयोक्ति: | ड.व्रतती मुखोपाध्याय: | 70 |
| 11. | प्रफुल्लमिश्रकृतधर्मपदीयमहाकाव्ये रसतत्त्वपरिशीलनम् | Priyanka Mohanta | 74 |
| 12. | नैषधीयचरितस्य द्वितीयसर्गे तिङन्तपदविमर्श: | एलिना मिश्र: | 79 |
| 13. | लौकिकसंकृतसाहित्येषु अचेतनचरित्रानामुपयोग: | पियाली वेरा | 87 |
| 14. | रघुवंशस्य द्वितीयसर्गे बहुव्रीहि: समास: – एकम् अध्ययनम् | अनीता कुमारी पत्री | 95 |

# आधुनिकसाहित्येषु समाजस्य चित्रम्

ड.जगमोहन आचार्य:

कवे: काव्यचेतना यद्यपि अधिकतया सौन्दर्यचेतनया प्रभाविता दृश्यते तथापि समाजचेतना तस्य काव्यस्य सामाजिकप्रतिवद्धतां लोकाभिमुखितां च प्रतिपादयति।आधुनिकसाहित्ये कविनां काव्येषु समाजस्य चित्रं सत्यतां नीत्वा प्रतिफलति। समाजमेव कवे: काव्यरचनाया: भित्ति:। अत: समाजचेतना काव्यचेतनाया: एकोऽविच्छिन्न: अंश:।

समाजे लोलुपतां, हिंसावृत्तिं, निष्ठुरतां, ईर्ष्या,द्वेषं, दीनतां, निर्धनतां, विषमतां, सदाचारत्यागं, मानवमूल्यानां क्षरणं च विलोक्य कवय: काव्यानि विरचयन्ति। अद्य भारतवर्ष: दुर्जनै: लुण्टिता:। भारतवर्षे सर्वत्र दुराचार: दुर्व्यवहार: दुशासनं दुर्विपाक: विच्छुरिता: सन्ति। साहित्यदर्पणे विश्वनाथेन किं करणीयम् किं वर्जनीयं तदुपरि स्पष्टतया उक्तं।[१] परन्तु अद्य अकरणीये कार्ये लिप्ता: सन्ति प्रायत: जना:।

तीर्थस्थलं जना: आनन्देन गच्छन्ति। परन्तु तत्र असाधुनां आचरणेन कष्टं स्वीकुर्वन्ति। धर्मस्थानं धर्मकार्यत: दूरं गत्वा अधर्मस्य निकटतरं जातम्।। उक्तं यथा कवि:,

यच्च तीर्थेषु कोलाहलैराकुलं
लुब्ध-पण्डा जनैर्वञ्चकै: साधुभि:।
धर्मपाखण्डदिग्धैर्जनैश्चादितं
धार्मिकैर्वञ्चितं लुण्ठितं भारतम्।।[२]

प्रसङ्गस्य धारां नीत्वा कवि: प्रफुल्लमिश्र: चित्रमेकं चित्रयति। प्रचारक: भ्रमित्वा भ्रमित्वा अहिंसाया: प्रचारं कर्तुं यदा बहिर्गच्छति तदा तत्र लोभेन वशीभूता: भवति तथा तस्य अहिंसाया स्वरुपं नष्टं याति।

अहिंसा-सत्यास्तेयादि गुणविभूषत:
लोभेन पतसि कदा देहल्याम्।।[३]

सर्वत्र जनेषु विद्वेषभावना दृश्यते। एकरपरस्य गृहं भस्मीकरोति। अन्यत्र कोऽपि छुरिकया अन्यं मारयति, येन पृथिवी रक्तरञ्जिता भवति। समाजे मद्यपानस्य बहुलप्रयोग:। मद्यपस्य भयेन युवतयो: मार्गे गमनागमनं कर्तुं न पारयन्ति। सूर्यमणिरथ: तस्य 'आधुनिक भारतम्' काव्ये लिखति–ज्वलति कस्य गृहं खलु वह्निना क्व च पुनरुधिरार्द्रवसुन्धरा।

क्व च रुदन्महिलाऽपि निराश्रया लुठति निष्ठुरमद्यपवक्षसि।।[४]